# .. vishveshvaranIrAjanam ..

# ॥ विश्वेश्वरनीराजनम् ॥

## Sanskrit Document Information

Text title : vishveshvaranIrAjanam

File name : vishveshvaranIrAjanam.itx

Category : AratI

Location : doc_shiva

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 20, 2017

*sanskritdocuments.org*

# ॥ विश्वेश्वरनीराजनम् ॥

श्रीगणेशाय नमः ।
सत्यं ज्ञानं शुद्धं पूर्णं हृदि भातं
 वन्दे शम्भुं शान्तं मायागुणरहितम् ।
साक्षिरूपं तत्त्वं विद्वद्भिर्गम्यं
 वेदैर्ज्ञेयं नित्यं गुरुभक्तैर्वेद्यम् ।
  ॐ हर हर हर महादेव ॥ १॥

देवान् भीतान् दृष्ट्वा यः कृपयाविष्टो
 विषपानमपि कृत्वाऽसितकठो जातः ।
त्रिपुरं बिभिदे युद्धे दुर्भेद्यं सर्वैस्तं
 वन्दे सर्वेशं देवैर्हृदि ध्यातम् ।
  ॐ हर हर हर महादेव ॥ २॥

विघ्नविनाशनकर्ता भवतां यस्तातः
 पूज्यो निखिलैर्देवैर्दुरितं हरतु नः ।
स्कन्दः पुत्रो बलवान् तारकासुरहन्ता
 स्वमात्रे वरदाता ब्रह्मचर्यं धर्ता ।
  ॐ हर हर हर महादेव ॥ ३॥

दशमुखबाणप्रभृतयो भक्तास्ते जाताः
 नाहं वक्तुं शक्तः परिगणनं कृत्वा ।
ये देवानामैश्वर्यं स्वाधीनं चक्रुः
 तेषां चित्रं वीर्यं तव कृपया जातम् ।
  ॐ हर हर हर महादेव ॥ ४॥

पूजां कर्तुं विष्णुर्नेत्रं त्वयि समर्प्य
 राज्यं कुरुते जगतां त्रयाणां तव दृष्ट्या ।
यतीनां हृदये स्थित्वा कामं नाशयिता
 गङ्गाधर शिव शङ्कर गिरिजाधीशस्त्वम् ।
  ॐ हर हर हर महादेव ॥ ५॥

संहर्तृ शिवरूपमुग्रं तव ध्यात्वा

भीता देवाः सर्वे भक्तिं त्वयि चक्रुः ।
दुःखं दृष्ट्वा जगति शरणं त्वां यामो
देवानामपि देवं महादेवं प्रणुमः ।
ॐ हर हर हर महादेव ॥ ६॥

त्यक्त्वा धर्मं ब्रह्मा दुहितर्यासक्तः
दण्डं प्राप्तस्त्वत्तः पन्थानं नीतः ।
विद्योपदेष्टुस्त्वत्तः सनकाद्या भक्ताः
उपदेशं शृण्वन्ति वैराग्ये सक्ताः ।
ॐ हर हर हर महादेव ॥ ७॥

प्राणान्ते वै काश्यां मुक्तिं सर्वेभ्यो
वेदपुराणैः कथितां ददते नित्यं यः ।
सर्वज्ञं तमनादिं स्तौति यो भक्त्या
अर्थं कामं धर्मं मोक्षं लभते सः ।
ॐ हर हर हर महादेव ॥ ८॥

इत्यच्युतानन्दगिरिविरचितं विश्वेश्वरनीराजनं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. vishveshvaranIrAjanam ..
was typeset using XƎLATEX 0.99996
on January 20, 2017

Please send corrections to *sanskrit@cheerful.com*